Roll No.……………………….

Signature of Invigilator ………

Paper Code

MV-201

# पतंजलि विश्वविद्यालय

## University of Patanjali

## Examination August-2021

### एम. ए. व्याकरण, द्वितीयसत्रम्

### व्याकरणम्, प्रथमपत्रम्

### संस्कृतव्याकरणम् (क)

समयः - होरात्रयम् पूर्णाङ्काः ७०

---

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( खण्ड -क )

( व्याकरणमहाभाष्यम् )

१. अस्मिन् खण्डे चत्वारः प्रश्नाः दत्ताः प्रतिप्रश्नाय पञ्चदश अंकाः निर्धारिताः। कौचन द्वौ प्रश्नौ समाधेयौ। ( 2 x15 =30 )

1. 'इको झल्' इति सूत्रं भाष्यरीत्या वर्णयन्तु।
2. 'सार्वधातुकमपित्' इति सूत्रं भाष्यरीत्या स्पष्टीकुर्वन्तु।
3. 'अपृक्त एकाल्प्रत्ययः' इति सूत्रं भाष्यरीत्या वर्णयन्तु।
4. गाङ्कुटादि..' सूत्रे किमर्थं पृथक् ङित्कितौ क्रियेते भाष्यरीत्या वर्णयन्तु।

२. अस्मिन् खण्डे सप्त प्रश्नाः दत्ताः प्रतिप्रश्नाय पञ्च अंकाः निर्धारिताः। केचन चत्वारः प्रश्नाः समाधेयाः। ( 4 x5 =20 )

1. 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम' सूत्रस्य पदकृत्यानि भाष्यरीत्या वर्णयन्तु।
2. 'गोटाङ्ग्रहणं कृन्निवृत्त्यर्थम्'। इति वातिर्कं भाष्यरीत्या सप्रसंग वर्णयन्तु।
3. 'नीचैरनुदात्तः' सूत्रे प्रथमानिर्दिष्टमण्ग्रहणम् अनुवर्तते न वाइति सकारणं वर्णयन्तु।
4. किमियकेश्रुतिरूदात्ता आहोस्विदनुदात्ता? भाष्यरीत्या वर्णयन्तु।
5. 'इन्धिभवतिभ्यां च' सूत्रं किमर्थम् उच्यते? भाष्यरीत्या वर्णयन्तु।
6. 'अस्मदो द्वयोश्च' इति सूत्रं भाष्यरीत्या वर्णयन्तु।
7. 'ह्रस्वो नपुंसके प्रातिपदिकस्य' सूत्रे अव्ययप्रतिषेधः कर्तव्यो न वा इति सकारणं वर्णयन्तु।

( खण्ड -ख )

( वाक्यपदीयम् - ब्रह्मकाण्डम् )

१. चतुर्णां श्लोकानां व्याख्यां कुर्वन्तु। ( 4 x5 =20 )

1. तद् द्वारम् अपवर्गस्य वाङ्मलानां चिकित्सितम्।
   पवित्रं सर्वविद्यानाम् अधिविद्यं प्रकाशते।।
2. एकस्य सर्वबीजस्य यस्य चेयमनेकधा।
   भोक्तृभोक्तव्यरूपेण भोगरूपेण च स्थितिः।।
3. इदं आधं पदस्थानं सिद्धिसोपानपर्वणाम्।
   इयं सा मोक्षमाणानाम् अजिह्मा राजपद्धतिः।।
4. अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम्।
   विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।
5. यत्र वाचो निमित्तानि चिह्नानीवाक्षरस्मृतेः।
   शब्दपूर्वेण योगेन भासन्ते प्रतिबिम्बवत्।।
6. न चागमादृते धर्मस्तर्केण व्यवतिषुते।
   ऋषीणामपि यज्ज्ञानं तदप्यागमपूर्वकम्।।

---------------x---------------